**श्रीसुरसरस्वतीसभा, शृङ्गेरी**

**तृतीयपरीक्षा - प्रथमपत्रिका**

**दिनाङ्क: - ०२. ०२. २०२०** | **अङ्का: -१००**

**पूर्वाह्ण: १०.००त: १.००पर्यन्तम्** | **समय: - होरात्रयम्**

**1. पञ्चानां संस्कृते एकवाक्येन उत्तरं लिखत ।** **5**

1. वाग्देवता स्वहस्तेषु किं किं धारयति ?
2. सर्वे देवाः कं स्तोतुं समुपचक्रिरे ?
3. वृक्षच्छायायां प्रसुप्तः ब्राह्मणः किं दृष्टवान् ?
4. मल्लस्य नाम किम् ?
5. शङ्कराचार्यः कदा अवातरत् ?
6. कालिदासः कस्य सभायामासीत् ?
7. एकलव्यः कः?

**2. षण्णां द्वित्रै: वाक्यै: उत्तरं लिखत ।** **12**

1. नव गोप्यानि कानि ?
2. विद्यार्थी चेत् किं त्यजेत् ? सुखार्थी चेत् किं त्यजेत् ?
3. शुकशावकयोर्नाम किम् ? शावकौ काभ्यां व्यक्रीणात् ?
4. गृहीणी द्विजं किमवदत् ?
5. व्याधः कथमासीत् ?
6. पर्वतं वोढुं सिद्धः मल्लः राजानं किमवदत् ?
7. शङ्कराचार्यस्य प्रसिद्धाः शिष्याः के ?
8. पितामहः आत्मानं कथं दर्शितवान् ?

**3. त्रयाणां पञ्चषै: वाक्यै: संस्कृतेन उत्तरं लिखत ।** **9**

1. के के त्याज्याः ?
2. सुमतेरभिप्रायं विवृणुत ।
3. चित्रग्रीवः कः? सः स्वाश्रितान् कथं ररक्ष ?
4. विष्णोराकारं विवृणुत ।
5. केषां मतिः क्षीयते ?

**4. चतुर्णां मातृभाषया दशभिः वाक्यैः उत्तरं लिखत।** **16**

1. शङ्कराचार्यस्य जीवनं विवृणुत।
2. एकलव्यस्य गुरुभक्तिं विशदयत।
3. " ब्राह्मणः सर्पश्च " - अस्य कथायाः सारांशं लिखत।
4. कालिदासेन कृतं समस्यापूरणप्रसङ्गं विवृणुत।
5. " वागाडम्बरवान् लोके न किञ्चित् कर्तुमर्हति " – स्पष्टयत।

**5. चतुर्णां ससन्दर्भं मातृभाषया विवृणुत। (चतुर्णामेव)** **12**

1. " प्रभूतधनेन योजयिष्यामि "।
2. " केवलं जगति तेऽपि राक्षसाः "।
3. " रणे रावणं हत्वा त्वां नेष्यति "।
4. " न हि किञ्चित् गुरवे अदेयम् "।
5. " कुतो विद्यार्थिनः सुखम् "?

**6. द्वयोः अन्वयानुसारम् अर्थं मातृभाषया लिखत।** **4**

1. तस्मिन्विप्रकृताः काले तारकेण दिवौकसः।
तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः॥

2. विद्यया विमलयाप्यलङ्कृतो दुर्जनः सदसि मास्तु कश्चन।
साक्षरा हि विपरीततां गताः केवलं जगति तेऽपि राक्षसाः॥

3. गते तु रावणे सीतां प्रलपन्तीं स मारुतिः।
उक्त्वा रामस्य वृत्तान्तं प्रददौ चाङ्गुलीयकम्॥

**7. श्लोकद्वयं पूरयत।** **4**

1. प्रथमवयसि ------------------- विस्मरन्ति॥
2. दोर्भिर्युक्ता ----------------------- सुप्रसन्ना॥
3. पौलस्त्यः -------------------- मतिः क्षीयते॥

**8. गद्यस्य अस्य अनुवादं कुरुत।** **4**

विक्रमार्के विश्वम्भरां पालयति, योगी कश्चिदुज्जयिनीं प्रत्यागच्छत्। स च वेदवेदाङ्गवित् सकलशास्त्रप्रवीणः। किं बहुना? सः साक्षात् सर्वज्ञ एव। एकदा विक्रमः तस्य परमां ख्यातिं निशम्य तमाह्वातुं पुरोहितं त्रिविक्रमं प्रेषयामास।

**9. रिक्तस्थानानि पूरयत ।** **4**

1. आहारशुद्धौ -------------------------------------।
2. कुमारसम्भवं ----------------------- विरचितम्।
3. राजा बन्धुः -------------------------------------।
4. दृश् धातोः लोट् प्रथमपुरुषैकवचनम् ----------- ।

**10. त्रयाणां पर्यायपदानि लिखत ।** **3**

**1.** सारमेयः 2. झटिति 3. भूमिः 4. न्यग्रोधः

**11. त्रयाणां विरुद्धपदानि लिखत ।** **3**

1. आदिः 2. स्वल्पम् 3. ज्येष्ठः 4. सुराः

**12. वाक्यदोषं परिहरत ।** **3**

1. लक्ष्मीः कमले अधिवसति।
2. बालकः कन्दुकं क्रीड्यते।
3. तस्य चत्वारः पुत्राः आसीत्।

**13. त्रीणि पदानि संस्कृतवाक्येषु योजयत ।** **3**

1.श्रुतः 2. आह्वयामि 3. सदृशम् 4. तस्मिन्

**14. एकस्य रूपाणि सर्वपुरुषवचनेषु लिखत ।** **3**

1.अस् (अस्ति) लङ् 2. क्षीयते 3. भवेत्

**15. सन्धिं विभज्य सन्धिनाम लिखत ।** **3**

1. तल्लयः 2. रामो गच्छति 3. इतस्ततः

**16. लोकोक्तिं पूरयित्वा मातृभाषया विवृणुत (द्वे एव) ।** **4**

1. क्लेशः ----------------------- विधत्ते।
2. चक्रारपंक्ति ------------- भाग्यपङ्क्तिः।
**3.** याञ्चा मोघा ------------ लब्धकामा।

**17. संयोज्य लिखत ।** 4

| अ | आ |
| --- | --- |
| पठ्यते | यण सन्धिः |
| गच्छतु | ल्यबन्ताव्ययम् |
| उपविश्य | विसर्ग सन्धिः |
| रामोऽपि | लोट् लकारः |
| | कर्मणि |

**18. प्रयोगं परिवर्तयत।** 4

1. सर्पेण युक्तमेव कृतम् ।
2. बालकैः मधुरं खाद्यते ।
3. विष्णुः गजेन्द्रम् अरक्षत् ।
4. अहं परीक्षां लिखामि ।

-------------------------

**श्रीसुरसरस्वतीसभा, शृङ्गेरी**

**तृतीयपरीक्षा – द्वितीयपत्रिका**

**दिनाङ्क: - ०२. ०२. २०२०**

**अपराह्ण: १.३०त: ३.०० पर्यन्तम्**

**समय: - सार्धैकहोरा**

**अङ्का: ५०**

**1. एकं विषयमधिकृत्य दशभि: वाक्यै: संस्कृतभाषायां प्रबन्धमेकं लिखत ।** 5

1. उद्यानम् 2. दीपावली 3. धेनुः

**2. एकं विषयमधिकृत्य संस्कृतभाषायां पत्रमेकं लिखत ।** 5

1. शालायाः वार्षिकोत्सवं वर्णयन् मित्रं प्रति पत्रम् ।
2. अध्यापकाय भगिन्याः विवाहार्थं विरामं प्रार्थयन् पत्रम् ।

**3. द्वयो: लक्षणं सोदाहरणं मातृभाषया लिखत ।** 6

1. शतृ प्रत्ययः 2. विशेषणम् 3. कर्तरि-कर्मणि प्रयोगौ

**4. वाक्यदोषान् समीकुरुत ।** 3

1. पक्षिणः आकाशं डयन्ते ।
2. बालकः पुस्तकं पठामि ।
3. मूषकः माजरेण त्रस्यति ।

**5. द्वयो: रूपाणि सर्वपुरुषवचनेषु लिखत ।** 6

1. वन्दते 2. गच्छतु 3. अभवत्

**6. संस्कृतवाक्ये योजयत।** 4

1. पठित्वा 2. चतस्रः 3. बालकेभ्यः 4. लेखितुम्

**7. सर्वविभक्तिवचनेषु लिखत। (एकमेव)** 4

1. सुहृद् 2. विद्वस्

**8. वाक्यमेकं विवृणुत।** 2

1. यथा राजा तथा प्रजाः ।
2. विद्याविहिनः पशुः ।

**9. स्त्रीलिङ्गरूपं लिखत ।** 3

1.पठितवान्  2. त्रयः  3. भवन्तः

**10. एकस्य व्याकरणविशेषं लिखत ।** 2

1. गृहं परितः
2. व्याघ्रात् भयम्
3. रामाय नमः

**11. मातृभाषया अनुवदत** 5

1. गजः सिंहात् बिभेति ।
2. हे परिव्राट्, भिक्षायै कृपया आगच्छ ।
3. गङ्गायाः जलं पावनम् ।
4. शिष्यः गुरुं अनुचरेत् ।
5. बालकेन पाठः पठ्यते ।

**12. संस्कृतभाषायाम् अनुवदत ।** 5

| | |
|---|---|
| 1. ತಂದೆಯು ತನ್ನ ಮಕ್ಕಳಿಗೆ ಹಣವನ್ನು ಕೊಡುತ್ತಿದ್ದಾನೆ. | Father is giving money to his sons. |
| 2. ಮಾಲತಿಯು ತನ್ನ ಸಹೋದರನೊಡನೆ ವಾಸಿಸುತ್ತಿದ್ದಾಳೆ. | Malathy is living with her brother. |
| 3. ಅವರು ಸಾಯಂಕಾಲ ಮನೆಗೆ ಬಂದರು. | They came home in the evening. |
| 4. ಇಬ್ಬರು ಹುಡುಗರು ಶಾಲೆಯಿಂದ ಬರುತ್ತಿದ್ದಾರೆ. | Two boys are coming from school. |

5. ಬಟ್ಟೆಗಳನ್ನು ಒಗೆದ ಮೇಲೆ ತಾಯಿಯು ಊಟಮಾಡುತ್ತಿದ್ದಾಳೆ.

   Mother is eating after washing clothes.

-------------